दिनाङ्क :- 14.11.2025

प्रात: - 06:55

## बिहारराज्यस्य विधानसभा

बिहारराज्ये विधानसभा-निर्वाचनस्य मतगणना अद्य प्रातः अष्टवादनात् समारप्स्यते। बिहारराज्यस्य अष्टत्रिंशत्-जनपदानां षट्चत्वारिंशत् मतगणनाकेन्द्रेषु मतानां गणनं भविष्यति। विधानसभायाः त्रिश्चत्वारिंशदधिक-द्विशतं निर्वाचनक्षेत्राणां कृते द्वयोः चरणयोः निर्वाचनम् अभवत्। इलेक्ट्रॉनिक्-मतदान-यन्त्रेषु यत्र सर्वेषां षोडशाधिकषड्शतोत्तर-द्विसहस्त्र प्रत्याशिनां निर्वाचनभाग्यं निहितमस्ति , तानि यन्त्राणि कठोर-सुरक्षायाः मध्ये सशक्त-प्रकोष्ठेषु स्थापितानि सन्ति । आकाशवाण्या सह वार्तालापं कुर्वन् बिहारस्य मुख्य-निर्वाचनाधिकारी विनोदसिंह-गुञ्जियालः अवदत् यत् मतदाने उपयोजितानि ई.वी.एम्.-यन्त्राणि, वी.वी.पी.ए.टी.-यन्त्राणि च त्रिस्तरीय-सुरक्षा-व्यवस्थायाः अन्तर्गतं सशक्त-कक्षेषु स्थापितानि सन्ति । सर्वेषु गणनाकेन्द्रेषु विस्तृत-सुरक्षाव्यवस्था प्रकल्पितास्ति। समुचित-सुरक्षायै केन्द्रीय-सशस्त्र-आरक्षक-बलानां राज्य-आरक्षक-बलानां च नियोजनमपि कृतम् अस्ति। श्री-गुञ्जियालः प्रोक्तवान् यत् विधानसभाक्षेत्रेषु निर्वाचनार्थं नियुक्ताः पर्यवेक्षकाः अपि गणना-प्रक्रियायाः निरीक्षणार्थं गणनाकेन्द्रेषु उपस्थिताः भविष्यन्ति इति।

## राष्ट्रपति-बोत्सवाना

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः चीता-परियोजनायाः अन्तर्गतं भारते स्थानान्तरणार्थं बोत्स्वाना-देशेन चित्र-व्याघ्राणां प्रतीकात्मक-हस्तान्तरणम् अपशयत्। बोत्सवाना-देशस्य राष्ट्रपतिः डूमा बोको इत्येषः अपि अस्मिन् कार्यक्रमे उपस्थितः आसीत्। गृहीताः व्याघ्राः मूलरुपेण घांजी-प्रदेशस्य आसन्, ये भारत-बोत्सवाना-देशयोः विशेषज्ञैः सहकार्येण मोकोलोडी-अभ्यारण्ये स्थिते संगरोध-केन्द्रे विमोचिताः । बोत्सवाना-देशः भारते व्याघ्र-जनसङ्ख्यायाः पुनरुत्थानाय अष्टव्याघ्राणां दानं करिष्यति। व्याघ्र-परियोजना एका अद्वितीयोपक्रमः अस्ति यस्योद्देश्यं व्याघ्राणां दशकेभ्यः विलुप्ततायाः अनन्तरं पुनः भारतं प्रति आनयनम् इत्यस्ति। द्वाविंशत्यधिक-द्विसहस्रतमस्य सितंबर-मासे नामीबिया-देशात् अष्ट व्याघ्राः कुनो-राष्ट्रिय-उद्याने स्थानान्तरिताः। एतावता भारतं प्रति प्रेषिताः व्याघ्राः, तेषां नूतनपरिवेशे सम्यक्प्रकारेण सम्पृक्ताः सन्ति।

## प्रधानमन्त्री-कोयम्बटूरयात्रा

प्रधानमन्त्री नरेन्द्रमोदी नवम्बर-मासस्य एकोनविंशे दिनाङ्के तमिलनाडुराज्यस्य कोयंबटूर-नगरस्य यात्रायै गमिष्यति। अत्रावसरे सः तमिलनाडुराज्यस्य कृषक-सङ्घैः आयोजिते दक्षिण-भारत-प्राकृतिक-कृषि-शिखर-सम्मेलनं सम्बोधयिष्यति। प्रधानमन्त्री दक्षिण-राज्येभ्यः आगतैः जैविक-कृषि-विशेषज्ञैः पञ्चाशत् वैज्ञानिकैः सह अपि संवादं साधयिष्यति। अस्मिन् शिखर-सम्मेलने व्यापक-प्राकृतिक-कृषि-कार्याय नीतयः निर्मास्यन्ते। अवसरेऽस्मिन् त्रिशत-पण्यकेन्द्रैः संवलिता प्रदर्शनी, प्रख्यात-वैज्ञानिकानां नीति-निर्मातृणां

च संवाद-सत्राणि, सजव-प्रदर्शनानि, युवकानां महिलानां च सहभागिताश्च अस्य आयोजनस्य केन्द्रबिन्दवः भविष्यन्ति। कार्यक्रमस्तावत् भारतीय-प्राकृतिक-कृषि-धान्यं सहैव परम्परा-कृषि-विकास-योजना इत्यादिभिः राष्ट्रियोपक्रमैः सञ्चाल्यते।

## उपराष्ट्रपतिः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य नवदेहल्याः यशोभूमौ "रोटरी तेजस्-विङ्ग्स् आफ् चेञ्ज्" इति कार्यक्रमस्य उद्घाटनं करिष्यति। रोटरी इति चतुर्दशलक्षाधिकानां व्यवसायिकानां समुदायनेतृणां च वैश्विकजालम् अस्ति । भारते रोटरि-संस्थायाः दशसहस्राधिक द्विलक्ष सदस्याः सप्तषष्टि केन्द्रेषु स्थिता: सन्ति, ये समुदायानां परिष्कारार्थं सेवा-परियोजनासु सक्रियतया संलग्नाः सन्ति। त्रिदिवसीय कार्यक्रमे रोटेरियन्-संस्थायाः चतुर्दशशताधिका: निर्णायकाः, प्रभावकाः, अन्ये च अतिथयः भागं ग्रहीष्यन्ति इति संभाव्यते।

## क्रिकेट्

क्रिकेट्-क्रीडायां अद्य प्रातःकाले ईडन्-गार्डन्स् इत्यत्र टेस्ट्-क्रीडायाः श्रृङ्खलायाः प्रथमायां स्पर्धायां भारत-दक्षिण-आफ्रिका-देशयोः मध्ये स्पर्धा भविष्यति। भारतीयसमयानुगुणं प्रातः सार्धनववादने क्रीडा समारप्स्यते।